# पाठ-२१
# शल्यचिकित्साजनकः सुश्रुतः

**सारान्शः**
चिकित्साविज्ञानस्य द्वे विभागे- औषधिचिकित्सा, शल्यचिकित्सा च । सुश्रुतः शल्यचिकित्सा जनकः कथ्यते। सः विश्वामित्रस्य पुत्रः आसीत्। तस्य ग्रन्थः 'सुश्रुतसंहिता' नाम । सुश्रुतस्य उल्लेख: महर्षिणा वाल्मीकिना स्वरामायणे कृतम् । एतत् प्रमाणं यत् सुश्रुतः वाल्मीके: पूर्वम् आसीत्। सुश्रुतेन चत्वारि शल्यविधानानि उक्तानि- • यंत्रप्रणिधानम् • शस्त्रप्रणिधानम् •क्षारप्रणिधानम् • अग्निप्रणिधानम्। शल्यक्रियायां शताधिकानि यन्त्राणि-शस्त्राणि ।सुश्रुतेन शल्यक्रियार्थे न केवलं यन्त्राणाम् अपितु शस्त्राणां, सूच्यादीनां च उल्लेखं कृतम्। तेषां उपयोगविधिः च वर्णितः । सुश्रुतस्य प्रसिद्धेः आधारः सुनम्यशल्यचिकित्सा अस्ति । सः कृत्तां नासिकां पुनः स्थापने निपुणः आसीत्। एवं स अद्यतनप्लास्टिकसर्जरी नाम विधेः जनकः कथ्यते। आरोग्यप्रदानं महापुण्यदायकम् अस्ति। आरोग्यशालास्थापना पुण्यदायकम् कर्म। आरोग्यदानेन पुरुषार्थचतुष्टयम् एव दत्तं भवेत्।

**मुख्य बिन्दवः**
भारतवर्षे आयुर्वेदस्य परंपरा अति प्राचीना विद्यते। सुश्रुतः गाधिपुत्रस्य विश्वामित्रस्य पुत्रः दिवोदास-धन्वन्तरेः शिष्यः आसीत् । तस्य प्रणीतं ग्रन्थं 'सुश्रुतसंहिता' इति कथ्यते। नागार्जुनेन वाग्भटेन च अस्य ग्रन्थस्य संपादनं कृतम्-इति अपि मन्यन्ते विद्वांसः ।
प्रचीनानां केषांचित् आयुर्वेदाचार्याणाम् नामानि स्मरत - इन्द्रः, धन्वन्तरिः, चरकः, सुश्रुतः, भास्करः, धवनः, भृगुः, नागार्जुनः, वाग्भटः, हारीतः, जतूकर्णः इत्यादयः ।

**अवगच्छामः**

| यन्त्राणां प्रकार: | सांख्या |
|---|---|
| 1. स्वास्तिकयन्त्राणि | 24 |
| 2. सन्दंशयन्त्राणि | 02 |
| 3. तालयन्त्राणि | 02 |
| 4. नाडीयन्त्राणि | 20 |
| 5. शलाकायन्त्राणि | 28 |
| 6. उपयन्त्राणि | 25 |

**स्वास्तिकयन्त्राणि (पशुमुखाकृतिसदृशानि)**
**यन्त्रनाम - 1.** सिंहयन्त्रम्, **2.** व्याघ्रयन्त्रम्, **3.** वृकयन्त्रम्, **4.** तरक्षुयन्त्रम्, **5.** ऋक्षयन्त्रम्**, 6.** द्वीपीयन्त्रम्, **7.** श्रृगालयन्त्रम् **8.** मृगयन्त्रम्
(**व्याघ्र** = बाघ, **वृकः** = भेड़िया, **तरक्षुः** = लकड़बग्घा, **ऋक्षः** = भालू, **द्वीपी** = चीता, **शृगालः** = सियार)

**आवश्यकोऽयं ज्ञानम्**
**स्वास्तिकयन्त्राणि (पक्षिचञ्चुसदृशानि)**
**यन्त्रनाम्- 1.** काकयन्त्रम्, **2.** कङ्कयन्त्रम्, **3.** कुररयन्त्रम्, **4.** चाषयन्त्रम्, **5.** श्येनयन्त्रम्, **6.** शशघाटयन्त्रम्, **7.** गृध्रयन्त्रम्, **8.** क्रौञ्चयन्त्रम्, **9.** अञ्जलिकर्णयन्त्रम्
**(काकः** = कौवा, **कङ्कः** = बगुला, **कुररः** = उकाब कुरी, **चाषः** =नीलकंठ, **शशघाटः** = चील, **गृध्रः** = गीध, **क्रौञ्चः** = सारस,, **श्येनः** = बाज,**अञ्जलिकर्णः**= उल्लू)

**व्याकरण बिन्दवः शब्द भण्डाराश्च**
**प्रत्ययाः-** प्रत्ययानां संयोगेन नूतनानि पदानि निर्मीयन्ते। **यथा-** धातोः- गत्वा, गतवती, गच्छत्, गम्यः, गन्तव्यः इत्यादयः ।
**सन्धिः**-वर्णानां परस्परं विकृतिमत् सन्धानं सन्धिः।**यथा -** रमा+ईशः=रमेशः, नै+अकः=नायकः, रवि+ईशः=रवीशः।
**समासः -** अनेकपदानाम् एकपदीभवनं समासः।यथा - दशरथस्य पुत्रः = दशरथपुत्रः, पीतम् अम्बरं यस्य सः = : पीताम्बरः।

**शब्दार्थाः**
1. प्रणिधानानि = प्रयोग
2. निरसनम् = हटाना
3. शस्ते = प्रशंसा की जाती है
4. शताधिकाः = सौ से अधिक
5. क्षारेण = रस से
6. अंगीकृतम् = स्वीकार कर लिया है
7. महावैद्यः = प्रमुख चिकित्सक
8. दत्तं स्यात् = दिए हुए के समान हैं

**योग्यतां वर्धयत**
चरकः आयुर्वेस्य प्राचीनविद्वत्सु चरकः अन्यतमः अस्ति। सः राज्ञः कनिष्कस्य शासने राजवैद्यरूपेण उषितवान् । मूलतः तु अयं गान्धारवासी आसीत् । अस्य कालः ईसापूर्वं प्रथमशताब्दी इति मन्यते । चरकस्य यशः भारतात् बहिः अपि प्रसृतम्। कविराजचरकस्य विषये सत्यमुक्तम् - 'चरकस्तु चिकित्सते।'चरकसंहिता चरकस्य आयुर्वेदीयः ग्रन्थः अस्ति । अयं सर्वप्रथमः सर्वश्रेष्ठः च कायचिकित्सायाः

ग्रन्थः वर्तते । सहस्रवर्षेभ्यः आयुर्विज्ञानस्य मूलं स्रोतः चरकसंहिता एव अस्ति । अयं ग्रन्थः अष्टभागेषु त्रिंशत्सु अध्यायेषु च विभक्तः । ग्रन्थे गद्यस्य पद्यस्य च उभयोः प्रयोगः कृतः। आयुर्वेदक्षेत्रे तु अयं ग्रन्थः ईदृशः लोकप्रियः जातः यत् अष्टभ्यां शताब्द्याम् एव अस्य अनुवादः अरबीभाषायां जातः । फारसीभाषायाम् अपि अनुवादः उपलभ्यते । पाठेऽस्मिन् प्रस्तुतः अंशः सूत्रस्थानस्य पंचम-अध्यायात् संकलितः ।

**पाठ संप्रेष्यः**

- चिकित्साविज्ञानस्य द्वे विभागे (i) औषधचिकित्सा (ii) शल्यचिकित्सा स्तः ।
- सुश्रुतः प्राचीनतमः शल्यचिकित्सकः, तस्य ग्रंथः- 'सुश्रुतसंहिता' ।
- शल्यचिकित्सायां यन्त्रशस्त्रक्षार-अग्निप्रणिधानानि इति चत्वारि शल्यविधानानि वर्णितानि ।
- शल्यचिकित्सकस्य लक्षणानि -(i) शूरः भवति । (ii) कार्याणि शीघ्रं सम्पादयति । (iii) तस्य शस्त्राणि तीक्ष्णानि भवन्ति (iv) शल्यकर्मनिष्पादने तस्य हस्तौ अकम्पमानौ भवतः । (v) मनसा स्थिरः भवति ।
- सुश्रुतस्य ख्यातिः नासाप्रतिष्ठापने अस्ति । सुनम्यशस्त्रचिकित्सा एव 'प्लास्टिक सर्जरी' इति कथ्यते । अत एव सुश्रुतः प्लास्टिक सर्जरी विज्ञानस्य अपि जनकः ।
- आरोग्यदानं पुण्यकार्यम् भवति ।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- ➢ पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- ➢ पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- ➢ अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।